माहेश्वरसूत्राणि

व्याकरण-प्रवेश-पाठ-माला

संस्कृतभारती

सीयाटल्, यू.एस्.ए

२९/०३/२००९

भूमिका

व्याकरणम्

- प्रयुक्तानाम् इदम् अन्वाख्यानम्
- प्रयोजनम् – यथा पूर्वजाः सहजतया परस्परं समभाषन्त, तथा शुद्धतया अनुवक्तुम्
- कालेन प्रयोग-स्रुतिः, तदनुसृत्य नूतन-नियम-रचना

- “एस्पेरान्तो”– कृत्रिमभाषा, तत्राऽपि व्याकरणं भाषाम् अनुसरति

पाणिनेः प्रसङ्गः

- पाणिनिः व्याकरण-प्राध्यापकः
  - तदानीन्तनं-व्याकरणं निष्फलम्
- पठनपरम्परा
  - कण्ठस्थीकृतस्य, अर्थबोधनम्
  - सूत्रलक्षणम्
- अक्षराणां गणानां ग्रहणार्थं माहेश्वरसूत्राणि

माहेश्वरसूत्राणि

माहेश्वरसूत्राणि

1. अ इ उ ण्
2. ऋ ऌ क्
3. ए ओ ङ्
4. ऐ औ च्
5. ह य व र ट्
6. ल ण्
7. ञ म ङ ण न म्
8. झ भ ञ्
9. घ ढ ध ष्
10. ज ब ग ड द श्
11. ख फ छ ठ थ च ट त व्
12. क प य्
13. श ष स र्
14. ह ल्

प्रत्याहाराः

1. अ इ उ ण्
2. ऋ ऌ क्
3. ए ओ ङ्
4. ऐ औ च्

- अण् - अ इ उ
- ऋक् - ऋ ऌ
- अक् - अ इ उ ऋ ऌ
- इण् - इ उ
- इक् - इ उ ऋ ऌ

माहेश्वरसूत्रतिप्पण्यः

- दीर्घस्वराः अन्तर्हिताः
- प्रत्याहारस्य अन्तिमाक्षरं अन्येषां ग्रहनार्थं एव
- प्रत्याहारस्य पूर्वाक्षरं कुत्रापि पूर्वं स्यात्
- प्रत्याहारस्य अन्तिमाक्षरस्य स्वग्रहणं नैव भवति
- पङ्क्तेः अन्तिमाक्षरस्य ग्रहणं अपि नैव भवति

- प्रत्याहारस्य अन्तिमाक्षरम् इत् इति अभिधीयते
- पङ्क्तेः अन्तिमाक्षरम् अपि इत् इति अभिधीयते

अभ्यास:

1. अ इ उ ण्
2. ऋ ऌ क्
3. ए ओ ङ्
4. ऐ औ च्
5. ह य व र ट्
6. ल ण्
7. ञ म ङ ण न म्
8. झ भ ञ्
9. घ ढ ध ष
10. ज ब ग ड द श्
11. ख फ छ ठ थ च ट त व्
12. क प य्
13. श ष स र्
14. ह ल्

वर्णमाला

- अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ
- क ख ग घ ङ
- च छ ज झ ञ
- ट ठ ड ढ ण
- त थ द ध न
- प फ ब भ म
- १ २ ३ ४ ५
- य र ल व
- श ष स ह

- अच्
- ञम् – ५
- झष् – ४
- जश् – ३
- खय् – १,२
- यण्
- शर्

कु चु टु तु पु

अष्टाध्याय्याः सूत्राणि

आगत्य

- आ + गम् + क्त्वा (१)
- = आ + गत् + क्त्वा (२)
- = आ + गत् + ल्यप् (३)
- = आगत्य (४)

(१-२) यदा पूर्वं आ-उपसर्गः, अनन्तरं क्त्वा-प्रत्ययः, गम्-धातोः स्थाने गत्-आदेशः भवति (गत् आगच्छति)

सूत्रव्यवस्था

- आ + गम् + क्त्वा

- यदा पूर्वं आ-उपसर्गः, अनन्तरं क्त्वा-प्रत्ययः, गम्-धातोः स्थाने गत्-आदेशः भवति (गत् आगच्छति)

- (१) पूर्वं (२) अनन्तरं (३) स्थाने (४) आदेशः च बोधयितुं किमपि तन्त्रम् आवश्यकम्

गमनागमनम्

हरीशः
जयपुरात्
शास्त्रपुरं
गच्छन्
अस्ति



पूर्व-बोधन-व्यवस्था

(आ + गम् + क्त्वा)

- आ-उपसर्गात्, अनन्तरं क्त्वा-प्रत्ययः, गम्-धातोः स्थाने गत्-आदेशः भवति।

1.	पूर्वं	आ-उपसर्गात्	५
2.	अनन्तरं	क्त्वा-प्रत्यये	७
3.	स्थाने	गम्-धातोः	६
4.	आदेशः	गत्	१

आगत्य

- आ + गम् + क्त्वा (१)
- = आ + गत् + क्त्वा (२)

- आ-उपसर्गात्, क्त्वा-प्रत्यये, गम्-धातोः गत्

- आ + गत् + क्त्वा (२)
- = आ + गत् + ल्यप् (३)

- उपसर्गात्, क्त्वा-प्रत्ययस्य ल्यप्-प्रत्ययः

सन्धिः

यण्-सन्धिः

- गच्छामि + अत्र = गच्छाम्यत्र

- इ-कारस्य य्-कारः, अ-कारे
- इ-कारस्य य्-कारः, अचि

शङ्का-समाधानम्

इ-कारस्य य्-कारः अ-कारे	इ-कारात् अ-कारस्य य्-कारः
गच्छामि + अत्र	गच्छामि + अत्र
गच्छाम् + (इ + अ) + त्र	गच्छाम् + (इ + अ) + त्र
गच्छाम् + (य् + अ) + त्र	गच्छाम् + (इ + य्) + त्र
गच्छाम्यत्र	गच्छामियत्र
इष्टरूपं साधितम्	इष्टरूपम् असाधितम्

इकः यण् अचि

- इकः (६); यण् (१); अचि (७)
- इक् = इ (ई) उ (ऊ) ऋ (ॠ) ऌ (ॡ)
- यण् = य् व् र् ल्
- अच् = अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ओ ऐ औ

- इकः स्थाने यण्-आदेशः भवति, अचि परे
- इकः {इ-उ-ऋ-ऌ}-इत्येतेषां स्थाने यण् {य्-व्-र्-ल्}-आदेशः भवति, अचि {स्वरे} परे

यण्-सन्धि-भेदाः

- इक् = ८ अक्षराणि
- अच् = १४ अक्षराणि
- ८ * १४ = ११२ नियमाः

- इको यणचि इति सूत्रं ~११२ नियमान् बोधयति। पूर्वम् ११२ वाक्यानि वक्तव्यानि आसन्।

एचोयवायावः

- एचः अय्-अव्-आय्-आवः अचि
- एचः (६); अय्-अव्-आय्-आवः (३); अचि (७)

- एच् – ए ओ ऐ औ

- एचः {अ-ओ-ऐ-औ}-इत्येतेषां स्थाने, अय्-अव्-आय्-आवः इति आदेशः भवति, अचि परे।

सिंहावलोकनम्

- व्याकरणस्य प्रयोजनम्
- माहेश्वरसूत्राणां प्रयोजनम्
- प्रत्याहाराः
- सूत्र-कल्पना-व्यवस्था
- सन्धि-सूत्राणि

प्रश्नाः – ajit.krishnan@gmail.com

समाप्तोऽयं पाठः